डुण्डुः, पुं, (डुमिति शब्दं डयते गच्छतीति। डी+डुः।) डुण्डुभसर्पः। इति त्रिकाण्डशेषः॥

डुण्डुभः, पुं, (डुण्डुः सन् भातीति। डुण्डु इत्यनुकरणशब्देन भाति वा। भा+कः।) सर्पविशेषः। ढोँड़ा इति भाषा। तत्पर्य्यायः। राजिलः २ इत्यमरः।१।८।५॥ डुण्डुभः ३। इति भरतः॥ नागभृत् ४ डुण्डुः ५। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते।२।११।२८।
"एकदा स वने घोरं डुण्डुभं जरसान्वितम्।
अपश्यद्दण्डमुद्यम्य हन्तुं तं समुपाययुः॥")

डुण्डुलः, पुं, (डुण्डुरिति शब्दं लातीति। ला+कः।) क्षुद्रपेचकः। तत्पर्य्यायः। क्षुद्रोलूकः २ शाकुनेयः ३ पिङ्गलः ४ वृक्षाश्रयी ५ वृहद्रावी ६ विशालाक्षः ७ भयङ्करः ८। इति राजनिर्घण्टः॥

डुलिः, स्त्री, (दुलि+पृषोदरादित्वात् साधुः।) दुलिः। कमठी। इत्यमरटीकायां रायमुकुटः॥

डुलिका, स्त्री, (डुलिरिव कायतीति। कै+कः। ततष्टाप्।) खञ्जनाकारपक्षिविशेषः। इति जटाधरः॥

डुली, स्त्री, (डुलिः+ङीष् वा।) चिल्लीशाकः। इति राजनिर्घण्टः॥

डोड़ी, स्त्री, क्षुपविशेषः। तत्पर्य्यायः। जीवन्ती २ शाकश्रेष्ठा ३ सुखालुका ४ वहुवल्ली ५ दीर्घपत्रा ६ सूक्ष्मपत्रा ७ जीवनी ८। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। दीपनत्वम्। कफवातकण्ठामयरक्तपित्तार्त्तिदाहनाशित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥

डोमः, पुं, स्वनामख्यातास्पृश्यजातिः। यथा,—
"चाण्डालस्यैव डोमस्य शानकस्य तथा इति।
दण्डीरस्यैव भण्डीरो भूमुण्डस्य वृथाश्रमी॥
वृथामुण्डी लिङ्गधारी समा एते यशस्विनि!।
स्पृष्ट्वा प्रमादतः स्नात्वा गायत्र्यष्टशतं जपेत्॥"
इति मत्स्यसूक्ततन्त्रे ३६ पटलः॥

डोरं, क्ली, हस्तादिबन्धनसूत्रम्। यथा,—
"कोऽनन्त इत्युदीर्य्याथ धृत्वा तत्करपल्लवम्।
हस्तादाकृष्य तड्डोरं क्षिप्तवान् पावकोपरि॥"
इति भविष्यपुराणे अनन्तव्रतकथा॥

डोरकं, क्ली, (डोर+स्वार्थे कन्।) डोरम्। यथा,
"चतुर्द्दशग्रन्थियुक्तं कुङ्कुमाक्तं सुडोरकम्।
स्त्रियश्च पुरुषस्यैव बध्नीयात् वामदक्षिणे॥"
इति भविष्यपुराणे अनन्तव्रतकथा॥

डोरडी, स्त्री, (डोरमिव डयते इति। डी+क्विप्।) वृहती। इति राजनिर्घण्टः॥

---

## ढ

ढ, ढकारः। स व्यञ्जनचतुर्द्दशवर्णः। टवर्गचतुर्थवर्णश्च। (अर्द्धमात्राकालेनोच्चारणीयः।) अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम्॥ (पाणिनीयादिषु अस्योच्चारणे जिह्वामध्यभागेन मूर्द्धस्पर्शः आभ्यन्तरप्रयत्नः। संवारनादघोषा महाप्राणश्च वाह्यप्रयत्नाः। मातृकान्यासेऽस्य दक्षपादाङ्गुलीमूले न्यासक्रिया। वङ्गीयवर्णमालायाम्।) तस्य लेखनप्रकारो यथा,—
"ऊर्द्ध्वाधःक्रमतो रेखा वामदक्षिणतो गता।
ततः सा कुण्डलीरूपा विष्णुशिवब्रह्मरूपिणी॥
महाशक्तिमयी मात्रा ध्यानमस्य प्रचक्ष्यते।
रक्तोत्पलनिभां रम्यां रक्तपङ्कजलोचनाम्॥
अष्टादशभुजां भीमां महामोक्षप्रदायिनीम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥ *॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।
"ढकारं परमाराध्यं या स्वयं कुण्डली परा।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा॥
सदा त्रिगुणसंयुक्तं आत्मादितत्त्वसंयुतम्।
रक्तविद्युल्लताकारं ढकारं प्रणमाम्यहम्॥"
तस्य २६ षड्विंशतिनामानि यथा,—
"ढो ढक्का निर्णयः पूर्व्वो यक्षेशादनदेश्वरः।
अर्द्धनारीश्वरस्तोयमीश्वरी त्रिशिखी नवः॥
दक्षपादाङ्गुलेर्मूलं सिद्धिदण्डा विनायकः।
प्रहासा त्रिवेरा ऋद्धिर्निर्गुणो निधनो ध्वनिः॥
विघ्नेशः पालिनी लक्ष्मधारिणी क्रोड़पुच्छकः।
एलापुरं लगात्मा च विशाखा श्रीमनोरतिः॥"
इति नानातन्त्रशास्त्रम्॥

ढः, पुं, (ढौकते उच्चैःशब्देन आप्नोति श्रवणेन्द्रियमिति। ढौक गत्यावरणयोः+डः।) ढक्का। (यथा, तन्त्रे।
"ढो ढक्का निर्णयः पूर्व्वो यक्षेशादनदेश्वरः॥")
श्वा। श्वलाङ्गूलम्। इति मेदिनी। ढ, १॥ निर्गुणः। ध्वनिः। इत्येकाक्षरकोषः॥

ढकः, पुं, देशविशेषः। इति भूरिप्रयोगः॥ ढाका इति भाषा॥

ढक्का, स्त्री, (ढक् इति गभीरशब्देन कायतीति। कै+कः टाप् च।) वाद्यविशेषः। ढाक इति भाषा। तत्पर्य्यायः। यशःपटहः २। इत्यमरः।१।७।६॥ विजयमर्द्दलः ३। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्।२४७।
"ढक्कामाहत्य मदं वितन्वते करिण इव चिरं पुरुषाः॥")

ढक्कारी, स्त्री, (ढक्कां जयढक्कावत् गभीरसिंहनादं ऋच्छति समराङ्गणे इति। ऋ+अण् ङीप् च।) तारिणी। यथा,—
"ढक्कारवा च ढक्कारी ढक्कारवरवा ढका॥"
इति कुलसद्भावे तारासहस्रनामस्तोत्रम्॥

ढण्टी, स्त्री, वाक्यविशेषः। यथा, रुद्रयामले अन्नपूर्णासहस्रनाम कथने।
"ढण्टीवाक्यस्वरूपा च ढकाराक्षररूपिणी॥"

ढालं, क्ली, (ढौकते आप्नोति शरीरं अनेन। ढौक+अच्। पृषोदरात् आत्वे लत्वे च साधुः।) फलकम्। ढालिपक्षजयकरीति अन्नदाकल्पीयसहस्रनामविवरणात्॥

ढाली [न्] त्रि, (ढालमस्यास्तीति। इनिः।) ढालविशिष्टः। चर्म्मी। यथा,—
"ढालिपक्षजयकरी ढकारवर्णरूपिणी॥"
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम्॥

ढामरा, स्त्री, हंसी। इति धनञ्जयः॥

ढुण्ढ, अन्वेषणे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ढाद्यन्तो दन्त्यनोपधः। ढयोगान्मूर्द्धन्यः। तेन यगादौ तल्लोपे ढुढ्यत इत्यादि। ढुण्ढति धनं लोकः। इति दुर्गादासः॥

ढुण्ढिः, पुं, (ढुढ्यतेऽसौ भक्तैरिति। ढुण्ढ अन्वेषणे+इन्।) गणेशः। तन्नामकरणं यथा,—
गणेशं प्रति शिववाक्यम्।
"अन्वेषणे ढुढिरयं प्रथितोऽस्ति धातुः
सर्व्वार्थढुण्ढिततया भव ढुण्ढिनामा।
काशीप्रवेशमपि को लभतेऽत्र देही
तोषं विना तव विनायक! ढुण्ढिराज!॥"
तन्माहात्म्यं यथा,—
"ढुण्ढे! प्रणम्य पुरतस्तव पादपद्मं
यो मां नमस्यति पुमानिह काशिवासी।
तत्कर्णमूलमधिगम्य पुरादिशामि
तत्किञ्चिदत्र न पुनर्भवतास्ति येन॥"
"यः प्रत्यहं नमति ढुण्ढिविनायक! त्वां
काश्यां प्रगे प्रतिहताखिलविघ्नसङ्घः।
नो तस्य जातु जगतीतलवर्त्ति वस्तु
दुष्प्रापमत्र परत्र च किञ्च नापि॥"
"प्रथमं ढुण्ढिराजोऽसि मम दक्षिणतो मनाक्।
आढुण्ढ्य सर्व्वभक्तेभ्यः सर्व्वार्थान् संप्रयच्छसि॥"
तस्य यात्राविधानं यथा,—
"माघशुक्लचतुर्थ्यान्तु नक्तं व्रतपरायणाः।
ये त्वां ढुण्ढेऽर्चयिष्यन्ति तेऽर्च्याः सुरसुरद्विषाम्॥
विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तापसीम्।
शुक्लां शुक्लतिलैर्व्वह्नीन् प्राश्नीयाल्लड्डुकान् व्रती॥
कार्य्या यात्रा प्रयत्नेन क्षेत्रसिद्धिमभीप्सुभिः।
तस्यां चतुर्थ्यां त्वत्प्रीत्यै ढुण्ढे! सर्व्वोपसर्गहृत्॥
तां यात्रां नात्र यः कुर्य्यान्निवेद्य तिललड्डुकान्।
उपसर्गसहस्रैस्तु स हन्तव्यो! ममाज्ञया॥
होमं तिलाज्यद्रव्येण यः करिष्यति भक्तितः।
तस्यां चतुर्थ्यां मन्त्रज्ञस्तस्य मन्त्रः प्रसेत्स्यति॥"
इति काशीखण्डे। ५० अध्याये॥

ढोलः, पुं, (ढः ढक्का तदाकारं लातीति। ला+कः पृषोदरात् ओत्वे साधुः। दुल उत्क्षेपे अच्। पृषोदरात् साधु र्वा।) स्वनामख्यातवाद्यम्। यथा,—
"ढक्काढोलप्रिया नित्या ढोलवाद्यप्रमोदिनी।
ढोलरूपा ढोलधरा ढोलशब्दस्वरूपिणी॥"
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम्॥

ढौक, ऋ ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) चतुर्द्दशस्वरी। ऋ, अडुढौकत्। ङ, ढौकते। इति दुर्गादासः॥ (आप्नोति। वदनं ढौकते। इति कालिदासः॥)

---